# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ७६

लक्ष्मणस्य तु तद्वाक्यं श्रुत्वा शत्रुनिबर्हणः ।
वृत्रघातमशेषेण कथयेत्याह लक्ष्मणम् ॥ १॥

राघवेणैवमुक्तस्तु सुमित्रानन्दवर्धनः ।
भूय एव कथां दिव्यां कथयामास लक्ष्मणः ॥ २॥

सहस्राक्षवचः श्रुत्वा सर्वेषां च दिवौकसाम् ।
विष्णुर्देवानुवाचेदं सर्वानिन्द्रपुरोगमान् ॥ ३॥

पूर्वं सौहृदबद्धोऽस्मि वृत्रस्य सुमहात्मनः ।
तेन युष्मत्प्रियार्थं वै नाहं हन्मि महासुरम् ॥ ४॥

अवश्यं करणीयं च भवतां सुखमुत्तमम् ।
तस्मादुपायमाख्यास्ये येन वृत्रं हनिष्यथ ॥ ५॥

त्रिधा भूतं करिष्येऽहमात्मानं सुरसत्तमाः ।
तेन वृत्रं सहस्राक्षो हनिष्यति न संशयः ॥ ६॥

एकोऽंशो वासवं यातु द्वितीयो वज्रमेव तु ।
तृतीयो भूतलं शक्रस्ततो वृत्रं हनिष्यति ॥ ७॥

तथा ब्रुवति देवेशे देवा वाक्यमथाब्रुवन् ।
एवमेतन्न सन्देहो यथा वदसि दैत्यहन् ॥ ८॥

भद्रं तेऽस्तु गमिष्यामो वृत्रासुरवधैषिणः ।
भजस्व परमोदारवासवं स्वेन तेजसा ॥ ९॥

ततः सर्वे महात्मानः सहस्राक्षपुरोगमाः ।
तदरण्यमुपाक्रामन्यत्र वृत्रो महासुरः ॥ १०॥

तेऽपश्यंस्तेजसा भूतं तपन्तमसुरोत्तमम् ।
पिबन्तमिव लोकांस्त्रीन्निर्दहन्तमिवाम्बरम् ॥ ११॥

दृष्ट्वैव चासुरश्रेष्ठं देवास्त्रासमुपागमन् ।
कथमेनं वधिष्यामः कथं न स्यात्पराजयः ॥ १२॥

तेषां चिन्तयतां तत्र सहस्राक्षः पुरन्दरः ।
वज्रं प्रगृह्य बाहुभ्यां प्रहिणोद्वृत्रमूर्धनि ॥ १३॥

कालाग्निनेव घोरेण दीप्तेनेव महार्चिषा ।
प्रतप्तं वृत्रशिरसि जगत्त्रासमुपागमत् ॥ १४॥

असम्भाव्यं वधं तस्य वृत्रस्य विबुधाधिपः ।
चिन्तयानो जगामाशु लोकस्यान्तं महायशाः ॥ १५॥

तमिन्द्रं ब्रह्महत्याशु गच्छन्तमनुगच्छति ।
अपतच्चास्य गात्रेषु तमिन्द्रं दुःखमाविशत् ॥ १६॥

हतारयः प्रनष्टेन्द्रा देवाः साग्निपुरोगमाः ।
विष्णुं त्रिभुवणश्रेष्ठं मुहुर्मुहुरपूजयन् ॥ १७॥

त्वं गतिः परमा देव पूर्वजो जगतः प्रभुः ।
रथार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ॥ १८॥

हतश्चायं त्वया वृत्रो ब्रह्महत्या च वासवम् ।
बाधते सुरशार्दूल मोक्षं तस्य विनिर्दिश ॥ १९॥

तेषां तद्वचनं श्रुत्वा देवानां विष्णुरब्रवीत् ।
मामेव यजतां शक्रः पावयिष्यामि वज्रिणम् ॥ २०॥

पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः ।
पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः ॥ २१॥

एवं सन्दिश्य देवानां तां वाणीममृतोपमा ।
जगाम विष्णुर्देवेशः स्तूयमानस्त्रिविष्टपम् ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com